॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥

१४. चतुर्दशः सर्गः

परिवृढघनसंघे राजसिंहोर्जशक्त्या
त्यजति मलिनभावं नीरसत्वान्निकामम् ।
स्फुटमुदयति तेजस्व्युज्ज्वले मध्वभानौ
सुजनजलजकांत्यै विश्वमासीन्मनोज्ञम् ॥ १४.१ ॥

कृतमपकृतमार्यैः क्षम्यतां क्षांतिभूषैः
इति मृदु वदतां च प्रार्थनाभिः प्रभूणाम् ।
अपहृतमपरेषां मंत्रतो ग्रंथजातं
दशहृदयनियोगादग्रहीच्छंकरार्यः ॥ १४.२ ॥

परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वैः
अवनतमुरुचेतःपादपार्श्वे नृसिंहम् ।
सहजविजयतोऽयुग्विक्रमार्यः प्रसन्नः
कविकुलतिलकोऽसावाशिषाऽतोषयत्तम् ॥ १४.३ ॥

उपचरति नितांतं हंत पौरंदरी धूः
द्युसदसि भजतो यं दुर्लभा दभ्रभाग्यैः ।
दिशतु स परमाग्र्यानंदतीर्थांघ्रिरेणुः
धरणिधर सुखं ते संततं स्वांतरेति ॥ १४.४ ॥

अनतिपरिचितस्याप्यस्य सोऽयं कवींद्रो
गुणरसमतिगूढं ज्ञातवानित्यचित्रम् ।
मधु मधुकरराजो निष्पतन् पौष्पमाप्तुं
ननु परिचयहीनः काननेऽपि प्रभुः स्यात् ॥ १४.५ ॥

अखिलखलकुलानां वर्धयन् द्वेषदोषं
विदधदपि नराणां कौतुकं मध्यमानाम् ।
स्वगतिसमुचितानां भूतिदायी शुभानां
बहळहृदिह निन्ये शर्वरीः काश्चिदेवम् ॥ १४.६ ॥

उदयति विनताया नंदने श्लाघ्यकाले
स कृतसकलकृत्यः कृत्यवेदिप्रवेकः ।
अरुणयवनिकांतर्ब्रह्म नारायणाख्यं
गुरुगुणमभिदध्यौ योग्ययोगासनस्थः ॥ १४.७ ॥

अतिधवळितदंता दंतकाष्ठैः प्रशस्तैः
अपि युगपदनेके सस्नुरत्र व्रतींद्राः ।
गुरुभिरभिहितेष्वाचारभेदेषु निष्ठां
स्फुटमवगमयंतः सौष्ठवात् कर्मणां च ॥ १४.८ ॥
चरमसमयसुप्ताः पूर्वमुत्थाय शिष्याः
गुरुजनपरिचर्यां चक्रिरे दुष्करां च ।
सबहुमति तदाद्यप्याऽर्धरात्रात् प्रसन्नाः
सुगतिरपरथैषां स्यात् कथंकारमिष्टा ॥ १४.९ ॥

श्रवणमननहेतोः प्राक् चिरायास्तनिद्रः
सपदि विवशयंत्या निद्रया ग्रस्तचेताः ।
स्वयमपि नयति द्रागंगवस्त्रादि पूज्ये
झटिति विगतनिद्रः कोऽपि शिष्योऽन्वशेत ॥ १४.१० ॥

विहितमविहितं प्रागेव कस्माद् विनिद्रैः
इति गुरुपरिवादाशंकया नम्रगात्राः ।
चिरमनवतरंतः श्रावका मुक्तमार्गाः
गुरुषु जलसकाशस्थेषु तूष्णीमतिष्ठन् ॥ १४.११ ॥

विपुलहृदयपार्श्वे दीपदीप्तिप्रदीप्ते
दरवरपरिपूर्णैर्वार्भिरर्घ्यादि दत्वा ।

यतिरतियतचेताश्चक्रिणोऽर्चानिकायात्
कुसुमसमितिमग्र्यामादरादुज्जहार ॥ १४.१२ ॥

अमृतमपि निरीक्ष्याऽस्रावि निर्माल्यसूने
घृतमिदमिति सद्यो भ्रांतिमंतोऽपि शिष्याः ।
श्रदधुरधिकवाक्यैर्विभ्रमास्तच्च पश्चाद्
अनुदिनममृतान्नैस्तस्य सेव्यस्य शक्त्या ॥ १४.१३ ॥

अगमदुचितमंत्रैस्तूदयानां त्रयाणां
कृतिभिरनुमतात्मा तत्र पंचांगविद्भिः ।
उदयमहिमरोचिश्चक्रवर्ती त्रिशक्तिः
दधदतिबृहदंतः षड्गुणं स्वात्मतेजः ॥ १४.१४ ॥

तिमिरनिकरकुंभिव्रातमत्यंततीव्रं
स्थिरतरमखिलानां प्राणिनां रुद्धमार्गम् ।
भुवनभवनपूर्णं भानुमानंजनाभं
हरिरिव नखरैः प्राग् रश्मिजालैर्निरास ॥ १४.१५ ॥

मधुरपतगरावाः शांतनैशांबुबाष्पाः
सपदि विपुलरागः स्वाभिसारात् प्रसन्नाः ।
अरुणतरणिरत्यच्छांबरा दिक्पुरंध्रीः
स्मितसरसिजवक्त्राः स्वैः करैरालिलिंगे ॥ १४.१६ ॥

प्रणतिरभसधूळीबद्धशोभाविशेषा
दधुरुपकृतिमत्तां साधुजालांतराप्ताः ।
समयमुपनतं संवेदयंतो वयस्या
इव दशशतकेतोः केतवः श्रावकाणाम् ॥ १४.१७ ॥

निहितमुचितमुच्चं योगपीठं प्रवक्तुः
परिषदि परितोऽमी सत्वराः सत्त्वभाजः ॥
द्रुतमवसितकृत्यैर्धन्यसंन्यासिवर्गैः

श्रवणपरमकृत्यायोपतस्थुः समेताः ॥ १४.१८ ॥

बभुरमलगुणानां शोभनाच्छादनानां
मुररिपुनिलयानां हंत वैदांतिकीनाम् ।
सपदि सुविवृतानामंतरर्था धियां वा
विविधकवळिकानां संचयाः पत्रिकाणाम् ॥ १४.१९ ॥

अनतिविरळभावा अप्यनन्योन्यसंगाः
ऋजुतरततनानापंक्तिसाम्याप्तशोभाः ।
द्विरदतुरगदेश्या दूरतो वर्जितांताः
कुशललिखितरूपा रेजिरे तेषु वर्णाः ॥ १४.२० ॥

सपदि ददृशुरेके वाचनीयादिभागं
परिचयपटुताभ्यां तावदेके चिरेण ।
हरिगुरुनमनं द्राग् यत्नतोऽमी विधाय
प्रययुरपरसाम्यं सिद्धये स्याद्धि यत्नः ॥ १४.२१ ॥

यतवचसि जनेऽस्मिन्नानते सन्निरस्यन्
सिचययवनिकां तां सांध्यजीमूतरक्ताम् ।
रविरिव रविपूज्यांघ्रिः समाजांतरिक्षे
व्यलसदति शयालुः सन् सहस्रप्रकाशः ॥ १४.२२ ॥

त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्ल
त्रितयरसतया ये वर्णिता वर्णवर्याः ।
पृथुमतिरथ तेषामैक्यमापाद्य सम्यक्
प्रवचनपरिशुद्ध्यै स्म प्रणौति प्रवीणः ॥ १४.२३ ॥

स्वरमचरमकाले मंद्रमेवात्यजद्भिः
स्फुटमुपनिषदंते वाचकैर्वाच्यमाने ।
प्रवचनमतिचित्रं प्राणभाजां श्रुतीनां
अमृतममृतभावस्यैष हेतुं चकार ॥ १४.२४ ॥

धनमिव सधनायेभ्योऽर्कसूनुः प्रसन्नः
शरशतमिव पार्थः संयुगार्थिभ्य उग्रः ।
अरतिविरहितः सोऽनारतं नाऽदिशन्नो
प्रतिवचनमदीनं चोदकेभ्योऽखिलेभ्यः ॥ १४.२५ ॥

अथ दशशतशोचिष्याप्रयाति प्रतीच्यां
प्रवचनमवसाय स्नातुमायात् तटाकम् ।
पृथुमतिरिह तावच्छ्रेष्ठसंसर्गलोलैः
समगमि सपदि स्वर्निम्नगाद्यैश्च तीर्थैः ॥ १४.२६ ॥

घनरसनिकरोऽसावंतरत्यंतशुद्धो
मुनिगण इव भूयः स्नेहवान् प्राग् दधानः ।
प्रतिकृतिमखिलज्ञस्याऽपरोक्ष्येण तावत्
स्फुटमलभत रूपं मज्जने सज्जनेष्टम् ॥ १४.२७ ॥

अपरिमितमनीषस्योल्लसच्छंखबाहोः
रथचरणिशिलानां तन्वतोऽत्राभिषेकम् ।
प्रतितनव उदारास्तास्वलं सन्निधातुः
तनव इव विरेजुः पांचजन्यप्रियस्य ॥ १४.२८ ॥

अभिदधति मुनींद्रा द्वादशाब्दोपवास
प्रतिमफलमलंयत्सेवनं भक्तियुक्तम् ।
अधिकममरनद्याद्याप्लवाद्धन्यमान्याद्
अपिबदलवबोधो विष्णुपादोदकं तत् ॥ १४.२९ ॥

तरणिभिरिव गौरैरूर्ध्वपुंड्रैर्द्विषड्भिः
सदरपरमचक्रोदीर्णतेजा हरीष्टः ।
मुररिपुविमुखानां दुस्सहो देहभाजां
लयसमय इवान्यो मान्यधीराबभासे ॥ १४.३० ॥

समधिकधिषणस्य प्रेक्षमाणो जनौघः
प्रकृतिमधुरमास्यव्याजपूर्णेदुबिंबम् ।
अमुचदपसरेति श्रावकोक्तेः पुराऽस्मिन्
प्रचलति पदवीं तां प्रांजलिस्तूर्णमारात् ॥ १४.३१ ॥

गुरुचरणसरोजद्वंद्वनिर्णेजनांभो
दधति जननिकाये सर्वमुर्वीगतं च ।
अवनिरनभिनंदिन्यप्यदश्चक्षमेऽसौ
कथमपि कथमेव स्यात् क्षमाख्याऽन्यथाऽस्याः ॥ १४.३२ ॥

अविदितरसभेदं शीतळं लघ्वगंधं
विमलममलपाणिः पाणिजैरप्रविष्टम् ।
वदनपवनभीत्या पार्श्वतो बिभ्रदग्र्यं
कमथ करकपूर्णं संयमीहानिनाय ॥ १४.३३ ॥

विहसितबिसभंगश्रीप्रकर्षं सितिम्ना
जलजममृतपूरैः पूरयामास रम्यम् ।
समयगुणविशेषालोचकैर्लाळनीयः
ससुरभिसुमनोभिः स स्फुटं गौरपक्श् अः ॥ १४.३४ ॥

विमलमलयजांभोबिंदुभिश्चर्चिताचो
नवललिततुळस्या पुष्पराज्याऽऽर्चिचत् सः
स्थलजजलजवल्लीवृक्षवीरुत्समस्त
प्रसवविजयलक्ष्म्या मूर्तयेवेंदिरेशम् ॥ १४.३५ ॥

स दददधिकबोधः षोडशात्रोपचारान्
व्यरहयदगुणान् द्वात्रिंशदागः पुरोगान् ।
अगणितगुणमुच्चैस्तोषयन् शार्ङ्गपाणिं
षडपि परमभक्त्याऽनूपचारान् दिदेश ॥ १४.३६ ॥

तमरुणमणिवर्णं दिव्यदेहाख्यगेहे

स्नपितमतिपृथुश्रद्धानदीचित्तवार्भिः ।
ननु स यजति नित्यं हृत्सरोजासनस्थं
न तु सकृदिति पुष्पैरष्टभिर्भावपुष्पैः ॥ १४.३७ ॥

कृतपरमसपर्यः सांद्रसच्चंदनांभः
परिमळितभुजोरोमंडलांसो मनीषी ।
स्मितरुचिरमुखेंदुः स्निग्धकौशेयवासाः
स मुनिसुरनराणां चक्षुषामुत्सवोऽभूत् ॥ १४.३८ ॥

परमथ परमान्नं प्राप्तमेवाप्रयासं
प्रभुरिह बुभुजेऽसौ वेदवादप्रवीणः ।
अजितपरमभक्तः संततं मन्यमानः
सकलजगदधीशः प्रीयतां शौरिरित्थम् ॥ १४.३९ ॥

सहचरपरिक्लृप्ते सूक्ष्मवस्त्रास्तृतेऽसौ
अवितनुरुहरूपौशीरवर्ये निषण्णः ।
अरमयदिह नानाहृद्यविद्याविलासैः
कविजनपरिवारं मंडयन् मंडपाग्र्यम् ॥ १४.४० ॥

अवसरमधिगम्य भ्रूविजृंभादभीष्टो
मुखसततगलक्ष्मीभूतपाणिप्रवाळः ।
स्मितनयनविकासैस्तस्य विज्ञातभावः
श्रवसि किमपि कार्यं मंत्रयामास मंक्षु ॥ १४.४१ ॥

प्रणतिपरमकृत्याः सन्मतेर्ये जनौघाः
विबभुरनतिदूरे संहतास्तानतीत्य ।
अहमहमिकयाऽऽशु प्राप्य पार्श्वं प्रणेमुः
बहव इह गृहस्थाः पूर्वसेवां विधातुम् ॥ १४.४२ ॥

विविधजनपदस्थाः प्राक् श्रुतेभ्यो गुणेभ्यः
शतगुणगुणमेनं विस्मिता वीक्षमाणाः ।

मुकुळितकरपद्मा आस्यतामित्यवाप्ताः
प्रचुरतरहृदा संभावयांचक्रिरेऽन्ये ॥ १४.४३ ॥

अलमलमनुवादेनानुवाच्येत पश्चात्
ननु गुरव इदानीमुद्यता हि प्रवक्तुम् ।
न मननमधुना द्रागाव्रजेत्याह्वयत् तान्
श्रुतपरिचयसक्तान् श्रावकान् श्रावकाग्र्यः ॥ १४.४४ ॥

अधिकधिषणमेनं व्याख्यया शोभमानं
हरिमिव कविवर्यं सत्यवत्यास्तनूजम् ।
सततमनिमिषं संदृश्य सानंदचित्ताः
समयमपि गतं संविद्रते न स्म लोकाः ॥ १४.४५ ॥

उदयमित इवास्तं यंश्च भानुर्बभासे
स्फुटमकलुशरूपो दर्शनीयोऽनुरागी ।
शुचि हरिपदमापत्संपदोराश्रितानां
न हि भवति विशेषः स्वप्रकाशोन्नतानाम् ॥ १४.४६ ॥

मरतकमणिवर्णे भूतधात्री पुरंध्र्याः
लसति जलधिवासस्यर्धलीनः क्षणार्धम् ।
अरुणतरणिबिंबच्छद्मना पद्मरागः
कपिशकरकलापोल्लास्यभूत् प्रेक्षणीयः ॥ १४.४७ ॥

अवनिवनवनध्रुग्वायुखाहम्महत्सु
प्रकृतिगुणसमेताव्याकृताकाश ऐकम् ।
ततमतनुमनाः सोऽचिंतयत् सत्समाधौ
असुरसुरनरेभ्यः सद्गुणं नाथमन्यम् ॥ १४.४८ ॥

व्यदधत परिदृष्टज्योतिषः साधु सांध्यं
नियममवनिदेवा ज्योतिषोऽप्यावलोकात् ।
विहितमनुसरंतो धर्मशास्त्रप्रवीणाः

सवितरि सवितारं चिंतयंतस्त्रिलोक्याः ॥ १४.४९ ॥

विविदुरतितरां ये देवताः षोडशोक्ता
हरहरिहयपूर्वांत्याः कलाभेदतोऽस्य ।
सुहुतमतिसृजंतोऽग्न्याहितास्तेऽग्निहोत्रं
व्यधुरुचितमपूर्वं येन गायत्रलोकः ॥ १४.५० ॥

विधुरयमकळंकः स्याद् यदि स्यादवश्यं
ननु निजसहजायाः सुंदरास्येंदुकल्पः ।
इति सुरललनाभिर्लाळितः खेचरीभिः
समधिकमधुरिम्णा पूर्णचंद्रस्तदोदैत् ॥ १४.५१ ॥

इनविरहमसह्यं प्राप्य पद्मैः सचक्रैः
चिरमिह परितप्तं पूर्वतप्तैः सुतुष्टम् ।
मृदुकुमुदचकोरैः पादसंगेन राज्ञः
कमपि सकलहृद्यं कल्पयेन्नैव दैवम् ॥ १४.५२ ॥

दलितेंद्रनीलमणिनीलविभ्रमं
नवकुंदकुड्मळसितद्विजावलि ।
स्मितया नगोत्तमशिरस्सुजातया
वनमालया सुरभिताशयाऽन्वितम् ॥ १४.५३ ॥

मृदुगामिविमानसंपदो
रमयत् सुस्मितगोपसुंदरीः ।
परितापविहीनमुज्ज्वलं
सुततं सूक्ष्मतरांबरं वरम् ॥ १४.५४ ॥

गोभिस्तमांस्यपनयन् गतिदं प्रजानां
अर्थांतरं स भगवान् प्रकटीचकार ।
आनंदचिद्गुणगणं परिपूर्णसंवित्
चंद्रस्तु शब्दगुणमित्ययमेव भेदः ॥ १४.५५ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत श्रीनारायणपंडिताचार्यविरचिते श्रीमध्वविजये आनंदांकिते चतुर्दशः सर्गः ॥